# Ribhuproktam Sarvamithyatvanirupanam

# ઋભુપ્રોક્તં સર્વમિથ્યાત્વનિરુપણમ્

## Document Information

Text title : Ribhuproktam Sarvamithyatvanirupanam

File name : RRibhuproktaMsarvamithyAtvanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 32| 2-31,36,49||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં સર્વમિથ્યાત્વનિરૂપણમ્

(સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ)
વક્ષ્યે પુનરસત્ત્યાગં બ્રહ્મનિશ્ચયમેવ ચ ।
યસ્ય શ્રવણમાત્રેણ સદ્યો મુક્તો ભવેન્નરઃ ॥ ૩૨.૧॥

ચિત્તસત્તા મનઃસત્તા બ્રહ્મસત્તાઽન્યથા સ્થિતા ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨॥

દેહસત્તા લિઙ્ગસત્તા ભાવસત્તાઽક્ષરા સ્થિતા ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૩॥

દૃશ્યં ચ દર્શનં દૃષ્ટા (દ્રષ્ટા) કર્તા કારયિતા ક્રિયા ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૪॥

એકં દ્વિત્વં પૃથગ્ભાવં અસ્તિ નાસ્તીતિ નિર્ણયઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૫॥

શાસ્ત્રભેદં વેદભેદં મુક્તીનાં ભેદભાવનમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૬॥

જાતિભેદં વર્ણભેદં શુદ્ધાશુદ્ધવિનિર્ણયઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૭॥

અખણ્ડાકારવૃત્તિશ્ચ અખણ્ડૈકરસં પરમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૮॥

પરાપરવિકલ્પશ્ચ પુણ્યપાપવિકલ્પનમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૯॥

કલ્પનાકલ્પનાદ્વૈતં મનોકલ્પનભાવનમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૦॥

સિદ્ધં સાધ્યં સાધનં ચ નાશનં (શાસનં) બ્રહ્મભાવનમ્ ।

સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૧॥

આત્મજ્ઞાનં મનોધર્મં મનોઽભાવે કુતો ભવેત્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૨॥

અજ્ઞાનં ચ મનોધર્મસ્તદભાવે ચ તત્કુતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૩॥

શમો દમો મનોધર્મસ્તદભાવે ચ તત્કુતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૪॥

બન્ધમોક્ષૌ મનોધર્મૌ તદભાવે કુતો ભવેત્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૫॥

સર્વં મિથ્યા જગન્મિથ્યા દેહો મિથ્યા જડત્વતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૬॥

બ્રહ્મલોકઃ સદા મિથ્યા બુદ્ધિરૂપં તદેવ હિ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૭॥

વિષ્ણુલોકઃ સદા મિથ્યા શિવમેવ હિ સર્વદા ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૮॥

રુદ્રલોકઃ સદા મિથ્યા અહઙ્કારસ્વરૂપતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૧૯॥

ચન્દ્રલોકઃ સદા મિથ્યા મનોરૂપવિકલ્પનમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૦॥

દિશો લોકઃ સદા મિથ્યા શ્રોત્રશબ્દસમન્વિતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૧॥

સૂર્યલોકઃ સદા મિથ્યા નેત્રરૂપસમન્વિતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૨॥

વરુણસ્ય સદા લોકો જિહ્વારસસમન્વિતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૩॥

ત્વચો લોકઃ સદા મિથ્યા વાયોઃ સ્પર્શસમન્વિતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૪॥

અશ્વિનોર્ઘ્રાણલોકશ્ચ ગન્ધદ્વૈતસમન્વિતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૫॥

અગ્નેર્લોકઃ સદા મિથ્યા વાગેવ વચનેન તત્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૬॥

ઇન્દ્રલોકઃ સદા મિથ્યા પાણિપાદેન સંયુતઃ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૭॥

ઉપેન્દ્રસ્ય મહર્લોકો ગમનેન પદં યુતમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૮॥

મૃત્યુરેવ સદા નાસ્તિ પાયુરેવ વિસર્ગકમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૨૯॥

પ્રજાપતેર્મહર્લોકો ગુહ્યમાનન્દસંયુતમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૩૦॥

સર્વં મિથ્યા ન સન્દેહઃ સર્વમાત્મેતિ નિશ્ચિતમ્ ।
તિતિક્ષોશ્ચ સમાધાનં શ્રદ્ધા ચાચાર્યભાષણે ॥ ૩૨.૩૧॥

અનેકશબ્દશ્રવણમનેકાર્થવિચારણમ્ ।
સર્વં મિથ્યા ન સન્દેહો બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૨.૩૬॥

સર્વં મિથ્યા ન સન્દેહો બ્રહ્મ સર્વં ન સંશયઃ ।
સર્વમુક્તં ભગવતા નિદિધ્યાસસ્તુ (નિજાધ્યાસસ્તુ) સર્વદા ॥ ૩૨.૪૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તઃ સર્વમિથ્યાત્વનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૩૨। ૨-૩૧,૩૬,૪૯॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 32. 2-31,36,49..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Sarvamithyatvanirupanam*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*